क्यादीनामभिन्नमौल्यानि ५७६।३८४।२४।२३०४ एषां प्राग्वत्संस्कारे क्रियमाणे जाताः समधनता ५५
४८ ९२ अथ सुवर्णगणितं सूत्रमाह ॥ सुवर्णवर्णाहतियोगेति ॥ सुवर्णवर्णाहति योगराशौ स्वर्णैक्य 31
भक्ते कनकैक्यवर्णः ॥ वर्णो भवेच्छोधितहेमभक्ते वर्णोद्धृते शोधितहेमसंख्या ॥८५॥ सुवर्णानि
च वर्णाश्च सुवर्णवर्णाः तेषां माहतयो गुणनानि तेषां योगराशौ उद्दिष्टसुवर्णानि स्वस्ववर्णैः संगु
ण्य तेषां योगः जातो यो राशिस्तस्मिन् स्वर्णैक्यभक्ते सति कनकैक्यवर्णः स्यात् मिश्रवर्णः स्यादित्यर्थः अ
हति योग इत्यनेन विचारितार्थोपि राशिपदोपादानं उपलक्षणार्थं यतोस्मादेव योगाद्ग्रे शोधितहेम
वर्णयोरानयनं विहितमस्ति एवं नो चेदेवं समासः वर्णाहतयोगएव राशिस्तस्मिन् इति अथ पुनः
शोधितयोस्तयोरन्यतरज्ञानेन योरानयनमाह वर्णो भवेदिति ॥ तस्मिन्नेव वर्णाहतियोगराशौ व
र्णे हृते सति शोधितहेमसंख्या स्यात् ॥ अत्रोद्देशकं वसंततिलकावृत्तेनाह ॥ विष्णाकेरुद्रेति ॥ ते

शोधने ज्ञानम्॥विश्वार्करुद्रदशवर्णसुवर्णमाषाः दिग्वेदलोचनयुगप्रमिताः क्रमेण॥आवर्त्तिते
षु वस्तेषु सुवर्णवर्णस्तूर्णं सुवर्णगणितज्ञ वणिग्भवेत्कः॥९५॥ते शोधने यदि च विंशतिरुक्त
आगतो ज्ञाय नमःप्रपञ्च माषाः स्युः षोडशाब्धिविरावर्णमितिस्तदा किं चेच्छोधितं भवति षोडशहेमवर्णस्ते विंशतिः कति
तदा प्रभवति माषाः॥९६॥भोः सुवर्णगणितज्ञ वणिक् तेषु चतुर्विधसुवर्णेषु आवर्त्तितेषु वर्णोऽज्ञा
यिते षु करसतां प्रापितेषु सत्सु अर्थः कः सुवर्णवर्णो भवेत् तूर्णं वदेति तेषु के सु विश्वार्करुद्रदशवर्णे
तिच्चयोदशवर्णा दशमाषमितं द्वादशवर्णं चतुर्माषमितं एकादशवर्णं द्विमाषमितं दशवर्णं चतुर्मा
षमित्यादिषु॥अथ ते विंशतिः प्रोक्तमाषाः शोधनेन यदि षोडशमाः स्युस्तदा द्विरावर्णमिति काः सु
वर्णवर्णमानं किमित्यर्थः अथ चेच्छोधितं हेम षोडशवर्णं भवति तत् याते विंशति माषाः कति भवंति
न्यासः १३|१२|११|१० / १०|४|२|४ क्रमात्सुवर्णवर्णाहतयः १३०।४८।२२।४० असंयोगराशिः २४० अयं सुवर्णैक्ये
न २० भक्तः लब्धो मिश्रवर्णः १२ अथ पुनर्विंशतिमाषात्मकस्य सुवर्णस्य २० शोधनेन जाताः षोडशमा
॥२१॥ षाः १६ तेन योगराशौ २४० भक्ते लब्धः शोधिते हेमवर्णः १५ अनेन पुनः राशौ २४० भक्ते लब्धं सुवर्णवर्ण
१६॥९७॥अथाज्ञातसुवर्णोद्देशसूत्रमाह स्वर्णैक्येति॥स्वर्णैक्यनिघ्नाद्युतिजातवर्णात्सुवर्णत
द्वर्णवधैक्यहीनात्॥अज्ञातवर्णोग्निजसंख्ययाप्तमज्ञातवर्णस्य भवेत्प्रमाणं॥९८॥जातवर्णस्व
र्णहाटकं सुवर्णं हेमकं अग्निजं अष्टापदमिति पर्यायाः युतिजातवर्णो उद्दिष्टमिश्रवर्णस्तस्मात् स्वर्णैक्यस्व
र्णतौल्यमानयोगस्तेन गुणितात् सुवर्णमानतद्वर्णवधैक्येनोनात् सकाशादज्ञातवर्णोग्निजसं

ख्ययाज्ञातः वर्णो यस्य तदज्ञातवर्णं तच्चाग्निजं स्वर्णं तत्संख्यया यदाप्तं तदज्ञातवर्णस्य प्रमा
णं भवेत्॥अत्रोद्देशकः॥दशेशवर्णेति स्पष्टोऽर्थः॥दशेशवर्णा वसुनेत्रमाषा अज्ञातवर्णस्य
षडेतदेकं जातं सखे द्वादशकं सुवर्णमज्ञातवर्णस्य वद प्रमाणं॥९९॥न्यासः १०|११|० / ८|२|६ युतिजा
तवर्णः १२ अयं स्वर्णैक्येन १६ निघ्नः १९२ अयं सुवर्णवर्णाहतयः १०।११ वधैः ८०।२२ ऐक्येन १०२ हीनः ९०
अज्ञातवर्णोग्निजसंख्यया ६ लब्धोऽज्ञातवर्णः १५ एवं न्यासः १०|११|१५ / ८|२|६ अस्मात् पूर्वसूत्रं रीत्या सु
वर्णवर्णाहतीत्यादिकया जातो युतिजातवर्णः १२ अत्रोपपत्तिः॥पूर्वसूत्रे तु अज्ञातयुतिवर्णस्य
ज्ञानार्थं सुवर्णवर्णाहतियोगराशिः स्वर्णैक्यभक्त आसीदिदानीं युतिवर्णस्य ज्ञातत्वात् पूर्वसूत्रवै
लोम्येन युतिवर्णः स्वर्णैक्येन गुणितः स च सुवर्णवर्णाहतियोगराशितुल्यो भवति तस्मात् ज्ञातसुवर्णा
हतिर्यदि शोधिता तर्हि अ— ज्ञातवर्णसुवर्णाहतिरवशिष्यते स चेदग्निजसंख्यया भाज्यते तर्हि अत
वर्णो लभ्यत इत्युपपन्नं॥९९॥अथ ज्ञातवर्णस्य तौल्यानयनार्थं सूत्रं वृत्तैकेनाह॥स्वर्णैक्यनिघ्न इति
स्वर्णैक्यनिघ्नो युतिजातवर्णः स्वर्णघ्नवर्णैक्यवियोजितश्च॥अहेमवर्णोग्निजयोगवर्णविश्लेषभ
क्तो विदिताग्निजं स्यात्॥१००॥युतिजातवर्णः स्वर्णैक्येन गुणितः सुवर्णगुणितवर्णैक्येन विहीनः॥
भास्तो नास्ति हेमस्वर्णो यस्य नाम अज्ञातहेमवर्णः स च अग्निजयोगवर्णयुतिजातवर्णश्च तयोर्यो विश्लेषां
तरं तेन भक्तो विदिताग्निजं स्यात् उदाहरति॥दशेन्दुवर्णा इति॥दशेन्दुवर्णा गुणचन्द्रमाषाः॥[illegible]॥गुण

विमिश्रितयोः षोडशकस्य तेषां जातं युतौ द्वादशकं सुवर्णं कति तत्र षोडशकस्य माषाः ॥१०१॥ गुणचंद्रमा
षाः दशेंदुवर्णाः संति यथा षोडशकस्य वर्णस्य किंचित्सुवर्णमस्ति तत्र ज्ञातं तेषां योगे द्वादशकं दम
मानं जातं तत्र षोडशवर्णस्य स्वर्णस्य कति माषाः स्युरिति प्रश्नः एवं न्यासः १६ । १४ । १२ । युतिवर्णः १२ अ
यं स्वर्णैक्येन ४ गुणितः स्वर्णघ्नवर्णैक्येन ४४ वियोजितः ४ अयमस्य वर्णः १६ युतिवर्णयोर्विश्लेषेण ४
भक्तः लब्धमज्ञातहेममानं माषाः १ एवं न्यासः १६ । १४ । १२ । ॥१॥ अथोद्दिष्टस्वर्णयोरुभयोरपि तौ
ल्याज्ञाने सूत्रं वृत्तं शालिन्याह ॥ साध्येइति ॥ साध्येनोनोऽनल्पवर्णो विधेयः साध्योवर्णः स्वल्पवर्णो
नितश्च ॥ इष्टक्षुण्णो शेषके स्वर्णमाने स्यातां स्वोऽस्वेनाल्पयोर्वर्णयोस्ते ॥२॥ साध्योवर्णो योगजवर्णोस्त
मनल्पवर्णो दधिकवर्णो विशोध्यः शेषं ग्राह्यं तथा स्वल्पवर्णः साध्यवर्णाद्विशोध्यः शेषं ग्राह्यं एवं ते शे
॥३३॥ षे एकद्व्यादिनेष्टेन गुणिते स्वल्पानल्पवर्णयोः स्वर्णमाने स्यातामित्यर्थः उदाहरणं ॥ हाटकेति स्पष्टं ॥
हाटकगुटिके षोडशदशवर्णे यद्युतौ सरवे जातं ॥ द्वादशवर्णं स्वर्णं ब्रूहि तयोः स्वर्णयोर्माने ॥३॥ न्यासः
१६ । १० । वर्णः अत्र यः युतिवर्णः स एव साध्यवर्णः १२ अनेनाल्प अधिकवर्णः ऊ १६ नितः मानं ४ अथ सा ॥३२
ध्यवर्णो स्वल्पवर्णो १० निते शेषं २ एवं शेषे ४ । २ एकेष्टेन १ गुणिते स्वल्पानल्पवर्णयोर्माषाः १६ । १० । द्विके
ष्टेन १६ । १० । त्रिकेन वा १६ । १० । एवमनेकधा ॥ अत्रोपपत्तिः ॥ उद्दिष्टवर्णयोर्योगजवर्णेन सहांकेयु
दंतरमस्तीति ज्ञातं येन साधिकादल्पे विशोधिते तत्... तेन तथा चोद्दिष्टवर्णयोर्मध्ये साध्यवर्णे

644
2006

र्णापेक्षया यो बहुस्तस्मात्साध्यो विशोधितेस्ततः साध्य... पोऽल्पवर्णः स एव साध्याद्विशो
धितः एवं साध्याद्बहुवर्णो यावताधिकस्तत्स्वल्पवर्णस्य मानं तथा साध्यः स्वल्पवर्णो यावान्न्यून
स्तद्बहुवर्णमानं यतो बहुवर्णः स्वल्पवर्णापेक्षया स्वर्णैकाग्नितांतरेणाधिकोस्ति अयसुवर्णव
र्णो इति योगराशावित्यादिना योगजवर्णानयने स्वर्णमाने एवं स्वर्णानां गुणको भाजकोश्च भवतः
तथा चेष्टगुणाभ्यामपि गुणकभाजकाभ्यां फलं तुल्यमेव स्यादुपपन्नं ॥३॥ अथ छंदःशास्त्रोपयु
क्तसिध्यर्थं कर्णेर सूत्रमनुष्टुप्पूर्वेनाह ॥ एकाद्येकोत्तराअंका इति ॥ एकद्व्याद्येति मूरववरनभे
दितिच ॥ आकाद्येकोत्तराअंका व्यस्ता भाज्याः क्रमस्थितैः ॥ परः पूर्वेण संगुणस्तत्परस्तेन तेन च
॥४॥ एकद्व्यादिभेदाः स्युरिदं साधारणं स्मृतं ॥ छंदश्चित्युत्तरे छंदस्युपयोगोस्य तद्विदां ॥५॥ मुखा
दृत्नभाहदे खंडमेरौ च शिल्पके ॥ वैद्यके रसभेदीयेतन्नोक्तं विस्तृतेभयात् ॥१०६॥ एकादिरेक
उत्तरो येषां ते एकाद्येकोत्तरः एकद्वित्रिचतुःपंचाद्या इत्यर्थः एवमुद्दिष्टकालापमनुस्मृत्य योंतिमोंकः
स्यात्तमारिकृत्य वामतो व्यस्ता अंकाः स्थाप्याः ते च क्रमस्थापितैरेकाद्यैरधस्थैः क्रमाद्भाज्याः आदौ प
रोंतिमः पूर्वेण संगुणस्तेन तत्परं संगुणयेत्तेन तत्परमिति यावदवसानं अयमर्थः आदावंतिमं पूर्वेण
संगुणय्य तं स्वाधस्थेन हरेण भक्त्वा लब्धं तेन तदग्रिमं संगुणय्य स्वच्छेदेन भक्त्वा लब्धं तेन तत्परं संगु
णय्य स्वछेदेन भक्त्वा एवं यावत्समाप्तिरित्यर्थः एकमेकद्व्यादिभेदाः स्युः अथ ... यंश्री...

33

"धेः संज्ञान्नमात्र इदं साधारणं छंदः सर्वत्र मतं स्वरप्रस्तारगणितं स्मृतं॥ अथास्योपयोगं दर्शयति छं
दश्चित्सुत्तरे इति छंदः श्चितिश्छंदो विचितिः॥ छंदोग्रंथाविदामुपयोगास्ति छंदांसीति ज्ञात्वाभिप्राये
णैकत्वं छंदो विचितिपूर्वं केषु ग्रंथेषु मया निरूपितस्यार्थः स्योपयोगो स्तीत्यर्थः॥ अथ न केवलमस्य
छंदः स्वेवोपयोगः किं तर्हि मूखावहनः भेदादेत था खंडमेरौत था शिल्पके रस्तमे दीयेवे घ्येके पिअ
स्योपयोगो स्ति खंडमेरौ संगीतशास्त्रोक्तस्वरप्रस्तारे विधौ तालप्रस्तारगांधर्वशास्त्रे एवमस्यास्या
नेकशास्त्रोपयोगित्वात्तत्तदुदाहरणानि यत्क आनीतिप्रासेन तत्परिहरं वक्ति॥ तन्नोक्तमिति॥ सू
त्रे कतिचिदभिप्राया स्तत्प्रोक्ताः परं मत्स्याङ्ग्रथबाकुल्यमिति संचिन्त्य नोक्तम्॥ अत्र छंदश्चिश्चित्सुत्त
रे उदाहरणां प्रस्तारे इति॥ प्रस्तरे मित्र गायत्र्यासु पादव्यक्तयः कति एकादिगुरवश्चाप्युक्प्यताम
पपकपयक॥२७॥ भोः मित्र गायत्र्याः प्रस्तारे चरणव्यक्तयः कति स्युस्तथा एकादिगुरवः एकगुरव
द्विगुरवस्त्रिगुरव इत्यादयः कति स्युरिति शीघ्रं पपकपयक प्यतां अथ गायत्रीचरण षडक्षरस्वाद्यास्ता
नामेकादिषडंतानामंकानां तथा क्रमस्थानां न्यासः ६ ५ ४ ३ २ १ प्रस्ताभाज्याः क्रमस्थितैरित्यु ॥३३॥
क्तेः हरेणानेन भाज्योयं ६ भक्तः लब्धं तदेव ६ अनेनैव पूर्वांकेनाद्वितीयः ५ गुणितः ३० निजाधस्थह
रेणा २ भक्तः लब्धेनानेन १५ तदुत्तरोयं ४ गुणितः ६० स्वहरेणा ३ लब्धं २० अनेन पूर्वांकेन २० तदुत्तरोयं ३
गुणितः छेद ६० हृते लब्धं १५ पूर्वांकेनानेन तत्परोयं २ गुणितः ३० स्वछेदेन लब्धं ६ अनेन तत्परोयं १ गु

णितां ६ छेदे ६ हृते लब्धं १ एवमनुक्रमाणां जातानां न्यासः एकादि ६ । १५ । २० । १५ । ६ । १ तत्रैकगुरवः षट् ६ द्वि
गुरुव्यक्तयः १५ त्रिगुरुव्यक्तयः २० चतुर्गुरुव्यक्तयः १५ पंचगुरुव्यक्तयः ६ षड्गुरवश्च १ एकः सर्वत्र लघुः सो
स्य एवमेषामेकं पादव्यक्तयो जाताः ६४ एवं चतुश्चरणाक्षरणाक्षरसंख्याकान्यथोक्तानि स्थितानि सैकी हन्यते जा
ना गायत्रीवृत्तसंख्या १६७७७२१६ अथ समग्रस्यापि गायत्रीवृत्तस्य एकादिगुर्वादिनयनार्थं न्यासः॥ ॥ ॥ ॥

[illegible]	२४	२३	२२	२१	२०	१९	१८	१७	१६	१५	१४	१३	१२	११	१०	९	८	७	६	५	४	३	२	१
[illegible]	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४
१	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	२४	१

अथ गायत्र्यास्तो क्रमेणानां सैकी कृतस्य तस्याय मर्थः सर्वेषामाद्यो एकः सर्वगुरुरिति प्रथमरूपं तथा अ
न्तेनैव पुनः सर्वेषामन्ते एकः सर्वलघुरिति हेतोः एवं जाता गायत्रीवृत्तसंख्या सा न्यसेत् १६७७७२१६ एवमुक्षतिपर्यंतं छं
दसां व्यक्तिव्यक्तिमिति ज्ञानं अथोत्कृतिर्नामषड्विंशत्यक्षरात्मकचरणोपलक्षितं वृत्तमित्यर्थः तथा चोक्तं पिंगलमते मा॥ श्री
वृत्यकेदारभट्टैर्वृत्तरत्नाकरे यथा तथापि आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्द्धितैः पृथक्छंदो भवेत्पादैर्यावत्षड्विंशतिं गतं
१ अथ तदभिधाः उक्तात्युक्ता तथा मध्या ३ प्रतिष्ठा ४ न्यासु पूर्विका ५ गायत्र्युष्णिक् ७ अनुष्टुप् च ८ बृहती ९ पंक्तिरव्य
१० १२ जगती १२ चैव तथातिजगती मता १३ ॥ सक्करी १४ स्यातिपूर्वा १५ स्यादष्टि १६ स्यष्टि १७ ततः स्मृते ३ धृति १८ श्चा
त्यष्टिरिति सति तस्मिन्नेव धृत्या त्रैधं चाधारं प्रस्तारानयन प्रकारः यथोक्तं तत्र चैव वृत्तरत्नाकरे केदारभट्टैः
प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलघुक्रिया संख्या चैवाध्वयोगश्च षडेते प्रत्ययाः स्मृताः अथ तत्रैव प्रस्तारः

69
2006
34

पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः। यथोपरि तथा शेषं भूयः कुर्यादमुं विधिं १ ऊने दद्याद्गुरूनेवं यावत्सर्वे लघुर्भवेत्। प्रस्तारोयं समाख्यातश्छंदोविचितिवेदिभिः २ अथास्यार्थः प्रोक्तछंदश्चरणे अक्षरमिता तां गुरूणां या श्रेणी तस्याः प्रथमं रूपं अथाद्यो गुरुः तदधो लघुं विन्यस्याग्रे गुरवः स्थाप्याः तद्द्वितीयं रूपं भवति अत्र गुरुलघुसंज्ञा स्थापनरीतिः स्वत्रैव ग्रंथारंभे स्पष्टीकृता अस्मिन् प्रस्तारे गुरुर्वक्रः लघुः सरलः अन्यमाने अंकमाने चोपलक्षितः तथा लघुः ऋजुः अयं वक्रतयोपलक्षितो गुरुः द्विमात्रत्वं ऋजुतयोपलक्षितो लघुरेकमात्र इत्यर्थः एवं ऊनस्थानाग्रे पूर्वे लघुस्थानात् अधोगुरुं न्यस्य शेषं यथोपरि तथैव कार्यं एवं पौनःपौन्येन यावत्सर्वलघुस्तावत्स्वरूपं भवति यावत्सर्वलघुरित्यनेन कृत्स्नप्रस्तारस्य समाप्तिः तथा उपलक्षणमपि सूचितं एवं वस्तुतो गायत्र्यां पादे षडक्षराणि तेषां प्रथमं रूपं षड्गुर्वात्मकं पंक्तौ विन्यस्य अधः द्वितीयादीनां रूपाणि न्यासक्रमेण तच्चरणेऽस्य प्रस्तारः तस्यायं न्यासः

१	ऽऽऽऽऽऽ	९	ऽऽऽ।ऽऽ	१७	ऽऽऽऽ।ऽ	२५	ऽऽऽ।।ऽ	३३	ऽऽऽऽऽ।	४१	ऽऽऽ।ऽ।	४९	ऽऽऽऽ।।
२	।ऽऽऽऽऽ	१०	।ऽऽ।ऽऽ	१८	।ऽऽऽ।ऽ	२६	।ऽऽ।।ऽ	३४	।ऽऽऽऽ।	४२	।ऽऽ।ऽ।	५०	।ऽऽऽ।।
३	ऽ।ऽऽऽऽ	११	ऽ।ऽ।ऽऽ	१९	ऽ।ऽऽ।ऽ	२७	ऽ।ऽ।।ऽ	३५	ऽ।ऽऽऽ।	४३	ऽ।ऽ।ऽ।	५१	ऽ।ऽऽ।।
४	।।ऽऽऽऽ	१२	।।ऽ।ऽऽ	२०	।।ऽऽ।ऽ	२८	।।ऽ।।ऽ	३६	।।ऽऽऽ।	४४	।।ऽ।ऽ।	५२	।।ऽऽ।।
५	ऽऽ।ऽऽऽ	१३	ऽऽ।।ऽऽ	२१	ऽऽ।ऽ।ऽ	२९	ऽऽ।।।ऽ	३७	ऽऽ।ऽऽ।	४५	ऽऽ।।ऽ।	५३	ऽऽ।ऽ।।
६	।ऽ।ऽऽऽ	१४	।ऽ।।ऽऽ	२२	।ऽ।ऽ।ऽ	३०	।ऽ।।।ऽ	३८	।ऽ।ऽऽ।	४६	।ऽ।।ऽ।	५४	।ऽ।ऽ।।
७	ऽ।।ऽऽऽ	१५	ऽ।।।ऽऽ	२३	ऽ।।ऽ।ऽ	३१	ऽ।।।।ऽ	३९	ऽ।।ऽऽ।	४७	ऽ।।।ऽ।	५५	ऽ।।ऽ।।
८	।।।ऽऽऽ	१६	।।।।ऽऽ	२४	।।।ऽ।ऽ	३२	।।।।।ऽ	४०	।।।ऽऽ।	४८	।।।।ऽ।	५६	।।।ऽ।।

५७	ऽऽऽ।।।
५८	।ऽऽ।।।
५९	ऽ।ऽ।।।
६०	।।ऽ।।।
६१	ऽऽ।।।।
६२	।ऽ।।।।
६३	ऽ।।।।।
६४	।।।।।।

इति प्रस्तारः। अथैषां रूपाणां नष्टमुद्दिष्टं च प्रसंगेन छंदोदिमध्यदुष्यते उद्दिष्टं नाम स्वेच्छया गुरुलघ्वात्मकं रूपं प्रकल्प्य तत्कियत्संख्यकं भवत्यतीति पृष्टे यत्तदुद्दिष्टं कथ्यते अथ रूपे अज्ञाते एतावत्संख्यके रूपं कीदृशं भवतीति पृष्टे यत्तन्नष्टमिति शास्त्रे अथ नष्टसाधनक्रमः नष्टस्य यो भवेदंकस्तस्यार्द्धेऽर्द्धे समे लः विषमे चैकमाधाय तस्यार्द्धेऽर्द्धे गुरुर्भवेत् ४ अस्यार्थः यो हि नष्टांकः स्यात्तस्यार्द्धेऽर्द्धे कृते सति यदि समांकः स्यात्तदा लघुः स्थाप्यः यश्च स्वभावतोपि समं स लघुरेव स्यात् विषमे तु एकमाधाय नाम क्षिप्त्वा तदर्द्धेऽर्द्धे कृते सति गुरुर्भवेत् अत्रापि च ल स्वभावतो विषमं गुरुः स्यादित्यर्थः यथात्र पंचत्रिंशत्तमं ३५ रूपं कीदृक् भविष्यतीति पृष्टे पंचत्रिंशत्तमः स्वभावाद्विषमोंकः अत एको गुरुः स्थाप्यः ततः पंचत्रिंशतेरर्द्धं न संभवत्यतः एकं १ क्षिप्त्वा ३६ अर्द्धं १८ समसंख्यं अतो द्वितीयस्थाने लघुं विन्यस्य अस्या १८ अर्द्धं ९ अस्य विषमत्वात्तृतीयस्थाने गुरुः स्थापितः नवानां ९ अर्द्धं न संभवत्यत एकं क्षिप्त्वा १० अर्द्धं ५ अस्यापि विषमात् चतुर्थस्थाने गुरुर्न्यस्तः अस्यार्द्धं न संभवत्यत एकं क्षिप्त्वा ३ अर्द्धं स्य ३

विषमत्वात्प्रथमस्थाने गुरुः स्थापितः अत्राप्येकः क्षिप्त्वा ४ अर्द्धितः २ अस्य समत्वात् षष्ठस्थाने लघुर्न्य
स्तः एवं कृते जातमिदं पंचत्रिंशतिप्रस्तारस्य रूपमिदं ऽ।ऽऽऽ। इति नष्टं अथोद्दिष्टमापितत्रोक्तं
उद्दिष्टद्विगुणानाद्यादुपर्यंकान्समालिखेत् लघुस्थाने तु ये त्वंकास्तैः सैकैर्मिश्रितैर्भवेत् अस्या
र्थः पादिकेन्वितिसृष्टमेनादकगुरुलघ्वात्मके रूपे किंपरिमितं भवतीति दृष्यकाद्यपरिद्विगुणांकान् लिखे
त् तत्र ये लघुस्थानस्थाअंकास्तैर्मिश्रितैरेकयुतैश्च उद्दिष्टं रूपं भवेत् यथा मिश्रितैः कस्मिन्नपि दृष्टे यस्मि
न्वेदुरेकः ततो गुरुद्वयं ऽऽ ततः पुनर्लघुः ततो गुरुश्च पुनरंते लघुः ।ऽऽ।ऽ। इदं कियत्संख्यास्या
दिति प्रश्ने षट्सु स्थानेषु द्विगुणांकान् संस्थाप्य तदधः प्रस्ताररूपं ।ऽऽ।ऽ। स्थाप्यम्या
सः

१	२	४	८	१६	३२
।	ऽ	ऽ	।	ऽ	।

अत्र लघुस्थानीया अंकाः १।८।३२ एषां योगः ४१ सैकः ४२ जात
मिदं रूपं द्विचत्वारिंशत्तमेऽस्तीति दृष्टमुद्दिष्टं एवं सर्वत्रेति दिक् सर्वेषां छंदसां
प्रस्तार आनेयः तस्य पर्यं उक्तासु क्तेति ग्रंथबहुल्यभयात् दिग्मात्रमेव निरूप्यते तत्र उक्ताख्याना
मेकाक्षरपदं छंदः तत्रैकं गुरुः स्यात् जातं रूपद्वयं २ अत्युक्ता नाम द्व्यक्षरपादं छंदः तत्र द्विगुरुमि
मितात् प्रथमपंक्तिविन्यासस्य प्रस्तारक्रमाज्जातं रूपचतुष्टयं ४

ऽऽ
।ऽ
ऽ।
।।

एते रितिगणा इति छंदःशास्त्रे प्र
सिद्धं एवं मध्या नाम त्र्यक्षरत्र्यात्मकैकपादं छंदो विशेषः तत्रापि प्राग्वत् प्रस्तारविधिना ३५

गुरुत्रयात्मकाद्यपंक्तेः सकाशाज्जातान्यष्टौ रूपाणि

ऽऽऽ
।ऽऽ
ऽ।ऽ
।।ऽ
ऽऽ।
।ऽ।
ऽ।।
।।।

एतेऽष्टौ गणाख्या आद्यरूपाणि मयरसतजभनाख्याः अष्टौ वर्णग
णा अपि भवंति एवं प्रतिष्ठा नाम चतुरक्षरात्मकैकपादस्थं छंदो विशेषः तत्रापि प्राग्वत्प्रस्तारविधिना चतुर्गुर्वात्मकप्र
क्तेः सकाशाज्जातानि षोडश रूपाणि जातानि ये नानि

ऽऽऽऽ
।ऽऽऽ
ऽ।ऽऽ
।।ऽऽ
ऽऽ।ऽ
।ऽ।ऽ
ऽ।।ऽ
।।।ऽ
ऽऽऽ।
।ऽऽ।
ऽ।ऽ।
।।ऽ।
ऽऽ।।
।ऽ।।
ऽ।।।
।।।।

एते षाणगणाख्या भवंति येषां संगीत एव प्रसंगे
वता नुपयोगः तं स सर्वेषामपि स्वल्पमिति विस्तरेण यस्सुप्र स्तारः कर्तव्यः स्वदक्षरमितान् प्रमोपंक्तौ विलिख्य
त स्व कास्वगतानां गुरूणां च प्रस्तार आनेयः तत्र एकार्था वे तरा अंकाः द्व्यादीना या आनीता एकद्व्यादिगुरुज्ञाप्य
स्थाः स्फुटतराः विलोकनीयाः ननु कथं विलोकनीयाः स्ता आत यथात्र एकगुरवः षट् संति एकगुरुवः नाम यत्रैको
गुरवः पंच लघवः एतादृशानि रूपाणि अस्मिन् गायत्री च रणस्य विस्तार्यमाणे प्रस्तारे सति षड् भवेयुरित्यर्थः
एवं द्विगुरवः पंचदश यत्र द्वौ गुरू चत्वारो लघवः एतादृशानि रूपाणि समग्रे चतुःषष्टि ६४ पंक्तिप्रस्तारे पंच
क.त्रि दशैव एवं त्रिगुर्वादि अथात्रैकैकलघ्वादिकं लचतुष्कान्तलादिस्तारेषु कानि सर्वगुरूणि रूपाणि कानि एकगुरूणि
कानि द्विगुर्वादीनीति ज्ञातव्येवाकृति सर्वगुरवः कत्येकगुरवः कति द्विगुरवः कति त्रिगुर्वादय इति कुतूहलायां ब
र्णध्वजां जरिति तन्नज्ञानार्थं क्रमः यथोक्तं पिंगले एषां वर्णं पताकाकीर्तिं पताकातिरा जस्येति एकद्व्यवस्था
लारस्य नोऽशावितिव्दर्द्धनां पूर्वपरेण संयुज्य तदधो लेखयेद्बुधः ॥१॥ अंतिमांकाविधिनैव लंघयेद्यत्र कुत्र
चित्ताः एकत्र लिखितं प्राक् पुनरंत्यत्र नोल्लिखेत् ॥२॥ अत्र स्फुटोऽर्थः तथापुदाहरणे साम्यग्दर्शयिष्ये प्रथम
स्थाने सर्वगुरवः द्वितीयस्थाने विविक्षितसर्वगुरुमध्ये एकं लघुं कृत्वा तावद्रूपभेदस्थानानि एवं तृतीयादिपं
क्तिषु एकैकगुरुयुतप्रस्तारस्थानानि यद्वा प्रथमः सर्वगुरुर्द्वितीयपंक्तावेकलघुस्थानानि तृतीयपंक्तौ द्विलघु
स्थानानि इत्यादि ज्ञेयं ॥ अथोदाहरणप्रकाशः १।१ अस्य द्विकल्यनाद्येकस्थानस्य एकगुरुः द्वितीयस्य एकलघुरिति

43/2006
36

एतावतैवसिद्धिः गद्यक्षरेयथा वतैवसिद्धिः प्रथमस्थानस्य घुरिति अक्षरा यथा योजनं कार्यं नवमभे

अत्रैकांकद्वयांकयोः संयोजनेत्र्यंकउत्पन्नः सचअंकाधःलेख्यः तस्यचतुर्विधत्वं स्यात् एकः सर्वगुरुः द्वितीयतृतीयस्थानस्थैकगुरुः एकलघुः चतुर्थस्थानस्थः सर्वलघुः अथ एकद्वयांकयोगेनत्र्यंकः सप्तांकाधः एकचतुरंकयोगेनपंचांकः स्तंभकाधः पंचांकेदशांकाभावतेन अंकस्य चतुरंकसंमेलनसम्भवधनिवेशयाः चतुरक्षरेयथा पताका ॥ ॥

अत्रैकद्वयोः सहत्रयंतद्वयकाधः पुनरेकंचतुर्भिः सहपंचकेकाधः एकाष्टयोगेनवधः द्वयष्टयोगेदशांकः षडधः द्विषोडशयोगोनकार्यः त्रिचतुर्योगे षट्‌अंकास्ते चतुरध समा दशाधः अष्टयोगे एकादशांकः सप्ताधः त्रिषोडशयोगेनकार्यं अंतिमत्वात्पंचचतुर्योगे नवां एत्रलिखित्वा तल्लेख्यः पंचाष्टयोगे त्रयोदशएकादशाधः चतुरष्टयोगे द्वादशाद्वाधः चतुःषोडशयो नकार्यं षडष्टयोगे चतुर्दशद्वादशाधः दशाष्टयोगोनकार्यः अष्टादशमेराभावात् सप्ताष्टयोगे शचतुर्दशाधः अत्रप्रथमस्थानेसर्वगुरुः द्वितीयपंक्तौ द्वित्रिपंचनवस्थानेएकलघवस्त्रिगुरवः मा को क गो पंचद श्वा न्याः ॥ चतुःषट्दशसप्तैकादशत्रयोदशप्रमरूपेषु द्विलघवो द्विगुरवश्चवेद्यान्याः ॥ अष्टद्वादशचतुर्दशपंचदशस्थानीयरूपेषु त्रिलघवएकगुरवश्च षोडशस्थानेसर्वलघुरितियोजनाउत्पथैवंनोत्पद्यामरश्मा एकगुरवो द्विगुरवस्त्रिगुर्वद्याश्चज्ञेया यथात्रप्रस्तारांते षोडशमंरूपं तत्सर्वलघुः ततोष्टद्वादशचतुर्दशपंचदशमरूपाणि एकगुरवइति ततोचतुःषट्‌दिगादि द्विगुरवइतिपूर्वप्रोक्तमपिवेशद्याथमिदंपुनरुक्तिः अथैवमेवसर्वत्रसमूहनीयं ॥ अथप्रागुक्तवत्सुप्रतिष्ठाछंदसः पंचाक्षरपादोपलक्षितस्यपताकायं ॥ ३७

अथैवंमेगापत्रीचरभेणे स्तारेकगुरवः इतिद्विगुरवस्ते ये वा इति तूर्णेपरिस्थितेयेउत्तेयेषट्‌पूर्ण मे अ प्रा द्वि पताका आप्येक द्विगुरवः गुरुस्था ॥५॥ ॥५१॥३॥१॥ त धः पं तुरे का कं वि चतुरवः एक धः अष्टांद्विल गलेअरवसंर क १ अस्यार्थः अक्षरसं यसमेरुनिः शांकस्यात्तु मेरुचो तेत्रस्वरवरोहावरोहोस्मनीः नानोसंरव्याप्रस्तारप्रत्ययार्थं रोतस्थावरोहणं मूर्छने-पुच्छ लक्रमादहनेपूर्वेणपूर्वेणतेषु तो सासाद्येकोनकोष्टानांमध्येप्रसन तथाच तानस्वरमितोध्वाधः पंक्ति

अत्रैकषाद्विगुरुस्थानेपूर्वयदेवदेवक्रमेएवंसर्वत्रषोडपंप षादिगुरुस्थानंतुपूर्ववदेवयथांस्यपंक्तितोवामतश्चाएक यथासोपंक्तिः ३२।४८।५६।६२।६०।६३ एकगुर्वात्मिका ततो नानिइमानि २४।४०।२८।४४।५२।३०।४६।५४।५८।३९।६३ नोष्ठांकाधिकत्रिगुरुपंक्तिः ततश्चतुरंकाधश्चतुर्गुरवः षंका षट्‌गुरुएवंलघुसंज्ञाजिज्ञासायांद्यकाधः पंक्तौ एकलघवः च वः अष्टाधस्त्रिलवइत्यादिपताका एवंछंदः प्रस्तारमेरो तु ॥ यथा रवकुहुः कुरुआइअंतपठमं ॥ सिरदुई अंकेअवरुभरु सुर्द्दे मेरु णिक्ते क्षाकान्केष्ठकान्कुरुआद्यंतयोः प्रथमांकेकुरु शीर्षेद्वयं अपरे द्वर कोधुनातत्प्रसंगे गानाचार्यानुक्तापिरवंडमेरुप्रयस्थाप्संक्षेपात्निरूप्य पडमध्यमगान्धाराश्चतुर्दशमूर्छनासंतितासुप्रत्येकंएकस्वरादिता खंडमेरोः प्रवृत्तिः तदुक्तं संगीतरत्नाकरे क्रमात्स्वराणांसप्तानामा रोहश्चावरोहणं मूर्छनेत्युच्यते ग्रामद्वयेताः सप्तसप्त च तथा अंकानेवादिसमांनोस्ताना एकस्वरादिसंख्यास्याक्रमेणप्रतिमूर्छनमिति अपिच पंडरेपरे १ एकस्वरादिसंख्यास्यात्क्रमेण प्रतिमूर्छनमिति अपिच पंरूपः तास्याद्यायामाद्यकोष्ठेलिखेदंकंपरेषुस्थापितंयादि क्रमेणन्यासः गांसांकमिश्रणात् एकस्वरादितानानां संख्या संजायतेक्रमात् इत्यादि

15 2006

37

नोर्धाधः रंतानसं नमस्तारे परि प्रोक्तं नृ २ अस्यार्थः रूलध्वात्मकांधिरिव स्मेन्यसेत् अत्रान्यशङ्केन यमर्थः यत्नाद्योलघुर्महानृत

१	२	३	४	५	६	७
स	रि	ग	म	प	ध	नि
१	०	०	०	०	०	०
१	२	३	२४	१२	०	७२०
४	१२	४८	२	४०	१४४०	
१८	७२	३६	०	२१६०		
९६	४८	०	२८८०			
६००	०	३६००				
४३२०						

पंक्तिस्थितानामंकानां योगे क्रियमाणे ॥ ॥ श्री ॥ वर्णमेरुस्यं प्रतिस्व स्याम १ रि १ ग म २६ प २४० नि ५२० एवं सर्वतान संख्या ५०४० ता पि चोक्तं तस्मात्समाद्या महतोधः स्थाप्यं यथो नामसंख्यास्तु संभवेमह तोलेख्य स्याभिपतंमकं धनतालंगु त्यातदेवयेक्ष्य आद्यामहतो द्रुतलघुगुरुवद्वच्पंतेम

१ १
१ २ १
१ ३ ३ १
१ ४ ६ ४ १
१ ५ १० १० ५ १
१ ६ १५ २० १५ ६ १

नोधः स्थाप्नत्पदेक्षयाद्रुतोरचनीयः एवं गुरोमहतिलघुरल्पतया लघुतेमहतिगुरुरल्पः स्यादेवं न्यसेत् यथोपरितथाशेषंन्यसेत् ऊनेऊनस्थाने तु यथासंभवं गुरुलघुनय वाद्रुतान्सान्यसेत् यावत्सर्वेद्रुता न भवंतितावत्कार्यं यथाएकतालीतालेएकोद्रुतोस्ति तस्य प्रस्तारे एकमेवरू पं तथाद्विद्रुतप्रस्तारे रूपद्वयं ।०।० तथाद्रुतोस्मिन् ०।आद्यान्महतोल्पे स्थापितं इत्यादिनाजातं रूपत्रयं ०। । ० ०० यथायथात्र तालेलघुद्वयमस्ति तस्य चत्वारोद्रुतः भवंति तेषां प्रस्तारे जातानिषड्रूपाणि ॥ऽ ।।। ००। ०।० ।०० ०००। एवं पंचद्रुत मास्ते जाता मतिविस्ता ॥ रेणअथा

निनवरूपाणि चार्यः शिष्येन वहनपरिमिते रियुक्तामधुर भोः गणक

०ऽ
०॥
।०।
००।
ऽ।
।।०
००।०
।०००
००००

एवमेवं तालेश्वीमार्गे तालानां प्रस्तारे विधिः कार्यः इत्यस्य वलनेति एकद्विन्यादि मुखा पारसभेदायेवैद्यकेपुदाहरणमाह एकद्विन्यादिमुखा शाखाविशाखे एकद्वि त्यादि ललिते भूमिभर्तुरम्येरम्येषण्मुखे चतुरविरचितेनश्लक्ष्णे मरुदुक्तया यान्नकस्यारतिकेर कस्मिन्नपदरसैः स्युर्गणकव्यंजनेव्यक्ति भेदाः १०८ भूमिभर्तुः कस्याचिद्राज्ञः अष्टमुखायुक्ते चतुरस्त्रधारिनिर्मिते सुतरां चतुरेणमृदुशला

काभिर्विविरचिते विपुले स्वह्नि णशालाभिर्विशालेएतरम्ये गृहेएकद्व्यादिमुखावलन परिमितिप्रमाणं वद मुखावहनायलिंदानीति केचित् वस्तुतस्तु अमुमर्थं तोराजगृहादौगायुसंचाराथर्भिनिच्छिद्राणीमुखास्ते एव इत्यर्थः अत्राद्युहिष्टपदेकाद्यपर्यंतानामंकानां व्यस्तानां क्रमगतानां च न्यासः

८	७	६	५	४	३	२	१
१	२	३	४	५	६	७	८

तं विधाय न्यस्त भाज्या क्रमस्थितैः परः पूर्वेण संगुण्येति प्राग्वत् यथाद्याङ्केनैव १ भक्तोऽ८ तेः स च ७ गुणिता ५६ छेदीभूतद्वयेनाप्तः २८ पुनः पूर्वालभेनानेन २८ परं संगुण्य १६८ स्वच्छेदेनत्रयेण लब्धः पूर्वाश्च्याः अनेन परं ५ संगुण्य २८० छेदेश्चाप्तं ७० एवं जातानां मुखवलनव्यक्तीनां क्रमेण न्यासः

८	२८	५६	७०	५६	२८	८	१
१	२	३	४	५	६	७	८

अत्रापि अष्टगुणोत्तमकं मध्यमरूपं प्रथमपु क्तौ नित्यस्य पादे सर्वगुरुवित्यादिनाप्रस्तारविधिना प्रस्तार आनेयः एतत् तुअनेन प्रकारतानेग्रंथ विस्तारभयात् चेनास्माभिर्लिख्यते अथोतराद्र्धेन सरस्यभेदोदाहरणं ॥एकद्वित्यादियुत्येति किंयमोगणकएक स्मिन्पाके व्यंजने मधुरादिकैः षड्रसैः एकद्व्यादियुत्याकति व्यक्तिभेदास्तान्वदेतिप्रश्ने न्यासः

६	५	४	३	२	१
१	२	३	४	५	६

अत्रापि प्राग्वदेव जाता अकस्मिन् रसविशेष मधुरादीनां रसानां योगे व्यक्तिभेदाः ६।१५।२०।१५।६।१॥ ॥ इति श्री सिद्धान्तपारगणितलीलावत्युदाहरणे श्रीमद्देवज्ञ निकराभिमतधनेश्वरकृते लीलावतीभूषणे पिअध्यायः ॥ ॥अ थश्रेढीव्यवहारेष्वणात्मकं तत्रनादौ सैकपदेति सैकपदघ्नपदार्द्धमथैकाद्यंकयुतिः किलसंकलिताख्या साद्वियुतेन पदेन विनिघ्नीस्यान्त्रिहृतातरवलुसंकलितैक्यं १०९ सैकपदघ्नपदस्यार्द्धं एकाद्यंकयुतिः संकलिताख्यास्यात् किं नस्यादित्यत्रय एकेनसहितं सैकं च तत्पदं च तेन घ्नं गुणितं च तत्पदं च तस्यार्द्धं नाचे सैकं पदघ्नं च तत्पदार्द्धं चेति अत्र पदशब्देन एकद्व्यादिनामंकानां कायोऽभीष्टः यस्य संकलितं विधीयते सोऽर्थः तदेवपदं तस्यार्द्धं विधाय सैकपदघ्नं कार्यं योसैकपदगुणितस्य पदस्यार्द्धं कार्यमिति अथ संकलितस्या

पिनामैकादियोगस्यापि संकलितमात्सेति स्यासंकलिताख्यायुतिश्च ष्यायुतेन पदेप्राक्तनेन गुणनीया तदनु त्रिभि
र्भक्ता सती संकलितैक्यं स्यात् अत्रोदाहरणमनुष्टुभात एकादीनामितिस्पष्टं एकादीनां नवांतानां पृथक् सं
कलितानि मे तेषां संकलितैक्यं च ब्रूहि गणक द्रुतं १० न्यासः १।२।३।४।५।६।७।८।९ अत्र प्रथमपदं १ सैकं
क २ अनेन पदं १ गुणितं २ अर्द्धितं १ जातं तस्य संकलितं १ एवं परमिष्टं द्वितीयं २ सैकपदेन ३ गुणितं ६ अर्द्धितं ३ द्व्योः संकलितं ३
अथ पदं त्रयः ३ सैकं ४ अनेन पदं गुणितं १२ दलितं जातं त्रयाणां संकलितं ६ अथ पदं ४ अस्यार्द्धं २ एतत्सैकपदेन ५
गुणितं १० तदा जातं चतुर्णां संकलितं १० एवं सर्वेषां संकलितानि १।३।६।१०।१५।२१।२८।३६।४५ अथवा पदं ५
अस्यार्द्धं ५/२ इदं सैकपदेन ६ गुणितं ३०/२ छेदहृतं पंचानां संकलितं जातं तदेव १५ अथवा सैकपदघ्नपदार्द्धमिति पा
ठः न्यायेपु नांतरकार्यं एकपदघ्नपदार्द्धमिति एकाद्येकयुतिः एकशब्दस्य केवलार्थः एकानामेकैकं त्यक्त्वा तत्सदंशने
न गुणितं च तत्परं तस्यार्द्धितमित्यर्थः यथेष्टं पदं ५ अनेन पदस्यार्द्धं ३ गुणितं जातं तदेव १५ अथ संकलितस्या
योगानयनार्थं न्यासः १।३।६।१०।१५।२१।२८।३६।४५ यथा त्रयाणां संकलितैक्ये ज्ञातुमिष्टे पदं ३ द्वियुतं ५ अनेन त्र
याणां संकलितमिदं ६ गुणितं ३० त्रिभक्तं सज्जातं त्रयाणां संकलितयुति १० एवं सर्वेषां संकलितैक्यानि १।४।१०।
२०।३५।५६।८४।१२०।१६५ अत्रोपपत्तिः एकोत्तरश्रेढ्यां पूर्वाद्ये त्रिभागे न गुणिते सति तदर्द्धं पूर्वसंकलितं स्यात्
इति नियमं दृष्ट्वैकस्यार्द्धेन दत्तं तद्वयस्यात्तानामेकस्यार्द्धं यत् संकलितमानेतुं प्रकारांतरं तत्तयोस्तथैकद्विपादयो
का उत्तरोत्तरमेकैकेनाधिकाः संत्यतः पूर्वांकः सैकः सन्नग्रिमांकतुल्यो भवति तेन स्वपदगुणितो द्विर्हृतश्च स्वस्य
संकलितं स्यात् अतः उक्तं सैकपदघ्नमिति अथ सा द्वियुतेनेति प्राक् या संकलिताभिधाना युतिर्जाता सा
प्रथमानुत्तरोत्तरं पदाधिकाभवत्यतः पूर्वयत् एकः क्षेपः द्वयं चहार आसीत्तावदेकाधिको क्षेपः तदा क्षयः क्षेपः २ त्रयं
हारश्च ३ एवं पूतसंकलितस्यापि संकलितं स्यादिति प्राप्तं ११० अथैकादीनां वर्गास घनैक्यानयनार्थं सूत्रं वृत्तं

द्विघ्नपदघ्नमिति द्विघ्नं पदं कुयुतं त्रिविभक्तं संकलितेन हतं कृतियोगः संकलितस्य कृते समम एकाद्येकघनैक्यमुदीरितमा
द्यैः १११ द्व्यां २ गुणितं च तत्पदं चैकेन युतं तेन त्रिभिर्भक्तं संकलितेन हतं सत् कृतियोगः स्यात् तद्वदेकाद्ये
कघनैक्यं संकलितस्य कृतेः समम् आद्यैः उक्तं एकादीनामेकानां संकलितस्य वर्गस्तत्तुल्यमेव घनैक्यमित्यर्थः अत्रोदा
हरणमनुष्टुभाह तेषामेवेति तेषामेव च वर्गैक्यं घनैक्यं च वद द्रुतं कृतिसंकलनमार्गे कुशला यदि ते मतिः १२ भो
गणक येद्यरि वर्गसंकलनमार्गे ते मतिः कुशला तर्हि तेषामेवैकाद्यंकानां घनैक्यं च शीघ्रं वद न्यासः १।२।३।४।५।
६।७।८।९ एषां प्रोक्तवर्गैक्यानि १।५।१४।३०।५५।९१।१४०।२०४।२८५ यथा त्रयाणां वर्गैक्या जिज्ञासा यपदं ३ द्विघ्नं ६ कु
युतं ७ त्रिभिर्भक्तं ७/३ त्रयाणां संकलितेन ६ हतं ४२/३ छेदहृतं संजातं त्रयाणां वर्गैक्यं १४ एवं सर्वेषां अथ घनैक्यानय
नार्थं एकादीनां संकलितस्य न्यासः १।३।६।१०।१५।२१।२८।३६।४५ एषां समद्विघातः स्यादिना वर्गस्ता जा
तान्यनुक्रमादेकादीनां घनैक्यानि १।९।३६।१००।२२५।४४१।७८४।१२९६।२०२५ अत्रोपपत्तिः पूर्वसंकलितै
क्यासिद्ध्यै द्वियुतेन पदेन संकलितं गुणितं ततस्त्रिहृतमासीत् इहतु द्विगुणितपदे सैकेन संकलितं संगुण्य त्रिभि
र्भक्तेन यतः संकलितस्यापि संकलितवर्गैक्यं भवति अयमर्थः संकलितनाम सैकपदघ्नपदार्द्धं तच्चेद्द्विगुणं विधी
यते तर्हि सैकपदघ्नपदं भवति तच्च पदाधिकपदवर्गतुल्यं तस्यापि पुनः पदगुणिते संकलितयुतेः सैव त्रिगुणवर्गैक्यं भव
भवति एवं संकलितं पूर्वं द्विगुणं ततः संकलितान्वितं सत् यतो लाघवार्थं द्विगुणपदे कयुतेन गुणितं एवं तत् त्रिगुणवर्गै
क्यसमं जातमतस्त्रिभिर्भागे हृते वर्गैक्यं स्यात् तदुक्तं द्विघ्नपदघ्नमिति ११३ अथेष्टाद्युत्तरश्रेढ्यां सर्वधनानयना
र्थं सूत्रं वृत्तेनाह व्येकपदघ्नेति व्येकपदघ्नचयो मुखयुक्स्यादंत्यधनं मुखयुग्दलितं तत् मध्यधनं पदसंगुणितं तत्

47506

गुणितं सत् सर्वधनं गणितं चतुर्दश ॥१७॥ अत्र यावत्प्रमिताद्यस्याह्ना मूलाभिधानात् द्रम्मानुमासाद्यं तन्मुखमित्युच्यते स
एवादिः अथ प्रतिदिने यावत्प्रमिता वृद्धिः स चयः यावद्दिनपरिमित्यर्थः यावंतो मुखपर्यायास्तावंत आदेः यावद्दिनपर्यंतं तं तं सग
च्छः पदसंज्ञापि तस्यैव अथवा स्वल्पाविगतः एको यस्मात् तद्व्येकं चतुः पदं चयेन घ्नो गुणितो यश्चयः समुखयुगाद्ययुतः
संत्यं अंत्यधनं स्यात् चयपितरह्नोंत्यदिने यावत्प्रमितं भवति तदित्यर्थः अथ मुखयुक्दलितमर्द्धितं सत्तदेव मध्यधनं स्या
त्॥ तन्नाम मध्यधनं पदेन संगुणितं सत् सर्वधनं आदिधनमारभ्यांत्यदिनपर्यंतं सर्वधनैक्यं भवतीत्यर्थः तदेव गणितं संज्ञ
मपि बोध्यं॥ अत्रोदाहरणं वृत्तेनाह आद्ये दिने इति॥ आद्ये दिने द्रम्मचतुष्टयं यो दत्वा द्विजेभ्योनुदिनं प्रवृत्तः दातुं सखे पंचचयेन
पक्षे द्रम्मान् वद संख्या कृति तेन दत्ताः॥२२॥ कश्चिदाप्तः पूर्वदिने द्रम्मचतुष्टयं दत्वा एतद्दत्तमुखं अनुदिनं प्रतिदिनं पंचवृद्ध्या
चयेन द्विजेभ्यो दातुं प्रवृत्तः तर्हि पक्षे पंचदिनात्मके कति द्रम्माः दत्तास्तान् वदेति प्रश्नार्थः न्यासः आदिः ४ पदं १५ व्येकपदं
१४ चयो ५ गुणितः ७० मुखेन ४ युतः सन् जातमंत्यदिनीयधनं ७४ एतन्मुखेन ४ युतं ७८ मर्द्धितं सत् जातं मध्यधनं ३९ एत
त्पदेन १५ संगुणितं सत् जातं सर्वधनैक्यं ५८५ मिदमेव गणितमिति अत्रोपपत्तिः यथात्रैव प्रथमदिने द्रम्मचतुष्टयं दत्तं
द्वितीयदिनात् प्रकाशाद्य पंचवृद्ध्या एवं पंचदशदिनपर्यंतं स एव गच्छः पंचयेन दत्तं स्वस्य चतुर्दशैवादिनानि जातानि
तथा प्रथमदिने रूपभिन्नजातीयवान् पृथगेव स्थितं अतो व्येकोगच्छः समुचितः अथानुपातः यद्येकदिने पंच द्रम्मा
स्तदा कश्चयस्तर्हि चतुर्दशदिने किं १।५।१४ मित्यत्र चतुर्दशभिश्चये गुणिते ७० जातं चतुर्दशदिनानां द्व्यंतं तत्पूर्वदिनद्रव्येण
४ युतं ७४ सन् जातमंत्यदिनस्य ७४ इत्युक्तं व्येकपदघ्नेति अथ मध्यधनापेक्षायां आद्यंतधनयो ४।७४ योगा
७८ र्द्धं ३९ मध्यधनमत उक्तं मुखयुग्दलितमिति॥ अथ सर्वधनज्ञानार्थं द्वितीयादिदिनधनानि तु पंचोत्तरवृद्ध्या ५ पंचद
शदिनपर्यंतं धनानि विलिख्यन्ते

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	दिन
[illegible]	९	१४	१९	२४	२९	३४	३९	४४	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	७४	धन

एषां योगः कृते जातं यत्तत्सर्वधनं भ ३

वतितद्यथा प्रथमदिनमादिधनं तथा पंचदशदिनस्य धनमंत्यधनं तथा पंचदशादिनेषु मध्ये ष्टमदिनस्य मध्यस्थत्वात् ष्टमदिनीयं द्रव्यं
मध्यधनं भवति तच्चांत्यधनाद्यधनयोर्योगार्द्धमितमेव एवं सर्वदिनधनानां योगे सर्वधनं स्यात् अथ लाघवार्थं मध्यधनं गच्छगुणि
तेपि फलं तुल्यमेवात मोक्तं मध्यधनं पदसंगुणितमिति ॥२५॥ एवं विषमगच्छोदाहरणमुक्त्वाधुना समगच्छोदाहरणमाह आदिस्स
प्तचयद्वैति आदिः सप्त चयः पंचगच्छोष्टौ यत्र तत्र मे मध्यांत्यधनसंख्ये वद सर्वधनं च कि ॥२६॥ भोः विद्वन् यत्र आदिः ७ चयः ५ ग
च्छः ८ तत्र मध्यांत्यधनसंख्ये सर्वधनं च किं वदेति प्रश्नार्थः आद्यि पूर्ववत् क्रमेणैव व्येकपदघ्नेति व्येकपदेन ७ चयो ५ गु
णितः ३५ मुखे ७ युतं ४२ अत्रात्र समदिने मध्यदिनाभावान्मध्यात्परदिनयोर्योगार्द्धं मध्यधनं भवतीति प्रतीति कृत्वा
द्यांत्ययोर्मध्यधनं ४९ योत्यधनं मुखयुक् ४९ दलितं सत्तदेव ४९ अत्रोपपत्तिः यथा पंचदशदिनामिते गच्छे प्रादिनसमस्त कृपरं दि
नसमकं तयोर्मध्ये एकमष्टमदिनं मध्यं च न तथा प्रतीयते एवं यत्र गच्छे द्विहृते सम्यक् शेषं स्यात्तत्र मध्यं यत्र न स्यात् सम वशि
ष्टं तत्सम गच्छे मध्यधनाभावः अत उक्तमाचार्यैः प्रतीतिकृत्याद्यतिनर्थ न्यासः

१	२	३	४	५	६	७	८
७	१२	१७	२२	२७	३२	३७	४२

अत्र साकूघस्य चत्वं
तथा त्याघस्य चत्वं तयोरंतर्दिनद्वयं भवशिष्टं तयो २२।२७ योगार्द्धं ४९ मध्यधनं वा द्यांत धनयोर्योगार्द्धमितं च सर्वधनं १९६
॥ अथ गच्छ सर्वधनयोर्ज्ञाने चयस्य चयस्यादिमध्यांत्यस्मिन्नुकूत्ते आनयनं वृत्तार्द्धं गच्छहृते इति गच्छहृते गणिते वदनं स्या
व्येकपदघ्न चयार्द्धविहीने गणिते सर्वधने गच्छहृते व्येकपदघ्न चयार्द्धविहीने सति आदिः स्यात् उदाहरणं पंचाधिकमि
ति पंचाधिकं शतं श्रेढीफलं सप्त पदं किल चयं च यं वयं वि ममावदनं वदनं दन ॥२७॥ स्पष्टोर्थः न्यासः सर्वधनमेव श्रेढीफलं वि
दं १०५ आदिः ० चयः ३ गच्छ ७ गणिते १०५ गच्छ ७ हृते १५ एकोनपद ६ घ्न चय १८ मुख ६ युक्त गुणित चयार्द्धेन ९ विहीनं जा
तं वदनं ६ अथास्माद्व्येकपदघ्नेत्यादिना त्यधनादि यथा व्येकपद ६ घ्न चय १८ मुख ६ युक्त २४ इदमेवांत्यधनं एतन्मु
ख ६ युक्त ३० दलितं सत् १५ जातं मध्यधनं १५ अत्रोपपत्तिः पूर्वसूत्र विलोम्येन पूर्वं मध्यधनं गच्छगुणं सर्वधन

माद्यैरिदितानीसर्वधने गच्छहृते मध्यधनं ज्ञातं तच्च व्येकपदघ्नचयार्द्धयुक्तयोगसमं तेन तस्माद्व्येकपदघ्नचयार्द्धे शुद्धे शेषमादिधनं अथादिगच्छसर्वधनेभ्यो चयसिद्ध्यर्थमाहोत्तरार्द्धं नगच्छतमिति गच्छहृतंधनमादिविहीनं व्येकपदार्द्धहृतं च
चयः स्यात् ७ धनं सर्वधनं गच्छहृतं सदादिविहीनं व्येकपदार्द्धहृतं चयः स्यात् उदाहरणं प्रथममगमदिति प्र
२ थममगमद्व्हायोजने योजनद्वयं तु नवक्रमशो ह्यति यातो ब्रूहि अरिकरिहरणार्थ योजनानामशीत्या रिपुन
गरमवाप्तः सप्तरात्रेण धीमान् ११८ यः जनेशः प्रथमम ह्ला दिने द्वे योजने योजनद्वयं गत्वा तदनु दिवसे हस्तिहर
णार्थं सप्तरात्रेण धीमान् योजनानामशीत्या रिपुनगरमाप्तः कथ्यतामित्यर्थः याताः स्तद्ब्रूहि अथ प्रथमं
सम्मत अथ समस्त सामन्त सीमन्तिनी सीमन्त सीमान्त सीमन्तितनिजयशः सीरसंचारप्रद्युति कश्चित्स्वम्भूपालमौलि कुल
कधुरीणो ऽखिलभूपरिपन्थि भूपाल कुलजाल पञ्चाल संचाल संचाल निखिल दक्ष कृपालवृन्दता दल
लकर्णतालकाहलास्फालसंजातपरभागजंघाल निजदुर्दोजनप्रतापवाचालशो यग्निज्वालजालजरा
लनिजजनशाले कालवालसुतमालदलगरलशोभालाय सूजविकरालकालकरालधाराल दग्धकीलालकलि
तकरवालभीतभीतपलायितारिकुलभूपालगह्वरगुंजरलिजालजाताल संकरणालभालातिजवालदं नाथल्लहरणा
यागच्छदित्यर्थः आ० २ च० १० प० ७ सर्वधनं ८० सर्वधनं ८० गच्छ ७ हृतं ८०/७ आदिना सहितरा ८०/७ २/१ विहीनं ६६/७ व्ये
कपदार्द्धे नहतं ६६/७ त्रिभिस्सम गच्छेदे तैषां योगः ५४/३ ५८/३ ८०/७ ८०/७ ११६/७ ... ... इष्टवर्तित संज्ञातं ११/३ अत्रोपपत्तिः प्राग्व
न गच्छेन सर्वधने भक्ते मध्यधनं ज्ञायते तस्मात् इष्टाद्यधनं विशोध्यते तत्रहि व्येकपदघ्नचयार्द्धमवशिष्यते तच्चैव व्येकपदार्द्धे
हीनतत्ति चयः स्यादित्युपपन्नं ११८ अथ गच्छज्ञानार्थं सूत्रं श्लेनाह श्रेढीफलादिति श्रेढीफलादुत्तरलोचनघ्ना
द्याद्यार्द्धवर्गान्तरवर्गयुक्तात् मूलं मुखोनं चयखंडयुक्तं चयोधृतं गच्छमुदाहरन्ति ११९ श्रेढीफलात्सर्वधनाच्चयनघ्ना

गुणितान्चयार्द्धमुखान्तरवर्गयुक्तात्सकाशान्मूलं यत्तन्मुखोनं चयार्द्धयुक्तं चयभक्तं सत्गच्छमुदाहरन्ति उदाहरणं द्रम्मत्र
यमिति द्रम्मत्रयं यः प्रथमेन्हिदत्वादातुं प्रवृत्तो द्विचयेन तेन शतत्रयं सप्तत्यधिकं द्विजेभ्यो दत्तं कियद्भिर्दिवसैर्वदाशु १२०
स्पष्टार्थः न्यासः आदि ३ च० २ फ० ० सर्वधनं ३७० अथेदमत्र श्रेढीफलं ३७० चयेन २ घ्नं ४ गुणितं १४८० चयार्द्ध १
मुखांतरस्यास्य वर्गेण ४ युतं १४८४ अस्य मूलं ३८ मुखोनं ३५ चयखंडे १ युतं ३६ चयो २ हृतं जातो गच्छः १८ अस्मा
त्प्राग्वदन्त्यधनं ३७ मध्यधनं २० सर्वधनं ३७० अत्रोपपत्तिः आदिधनमादिरूपं तद्द्विचयार्द्धयावतीरूपाणि सर्वधनाद्युद्धे
तिन रूपसंख्या गच्छप्रमाणं स्याद्यावत्तर्पणप्रकारान्तरतो गच्छ आनीयते चन्त्यधनं नाममध्यधनगच्छयोर्घातः मध्य
धनं नाम चयार्द्धव्येकगच्छाघातः मुखयुक्तः अथ सप्त द्विगुणमुखयुक्तः सन्नन्त्यधनं भवति एवं सर्वधने द्विगुणा
चयनगुणितं चयार्द्धवक्त्रान्तरवर्गयुक्ते चयार्द्धयुतस्यान्त्यधनस्य वर्गो भवति तस्य मूलं चयार्द्धयुतमन्त्यधनं त
न्मुखोनितं चयार्द्धयुतं सति चयगच्छयोर्घातो भवति तत्र चयेन भाज्यते न लागच्छः स्यादित्युपपन्नं १२० अ
थ द्विगुणोत्तरादिफलानयनार्थं सार्द्धार्या विषमगच्छ इति व्येकमिति च विषमे गच्छे व्येको गुणकः स्यात्समेर्द्धि
ते वर्गः गच्छक्षयान्तरपं स्याद्यस्तगुणवर्गजं फलं यत्तत् १२१ व्येकं व्येकगुणोद्धृतमादिगुणं स्याद्गुणोत्तरगणितं
१२२ यदा गच्छो विषमस्तदा तं निरेकं कृत्वा गुण इति संज्ञा कार्या तथा समे गच्छेर्द्धिते सति गुणकादधो वर्ग इति संज्ञा ले
ख्या एवं गच्छस्यान्ते नाम यावद्गच्छो निरेव शेषः इत्यर्थः अथान्त्यात्सकाशाद्यस्तगुणवर्गजं फलं यत्तदेकरहितं गुणोद्धृ
तं तथादिगुणं सद्गुणोत्तरगुणितं सर्वधनं स्यादित्यर्थः अत्रोदाहरणं पूर्वं वराटकमिति पूर्वं वराटकयुगं येन द्वि
गुणोत्तरं प्रतिज्ञातं प्रत्यर्थं अनाय समासेनिष्का नराति कति १२३ स्पष्टार्थः न्यासः आदि २ चयः गुणोत्त
रः २ वर्गः शेषे विषमगच्छः १५ अतः व्येक १४ मिदं कृत्वा गुण इति संज्ञा तथाकृते १४ गुणः एतत्समस्त
गच्छ ३० अत्र गच्छः १ समोस्मतः ३ अर्द्धिते सति वर्ग इति संज्ञा स्थापयेत् तथाकृते १५ ...

स्तादिगुणोत्तरस्तु तस्याद्य इदमेव अंतिमदिनद्रव्यं सर्वदिनद्रव्यैक्यापेक्षायां तु

नोद्दिष्टं ७ वर्ग इति संज्ञा तस्यापिता अथ शेषं विषमगच्छः ७ अतो व्येकं ६ स्यात् गुणकः अथेदं ६ समतोर्द्धितं ३ व
र्ग इति शेषं ३ विषमत्वाद्व्येकं सत् २ तदर्द्धितं एवं जातानापत्तिपर्यन्तं निरवशेषोगच्छः

वर्ग	८४
गुण	२४
वर्गः	७
गुण	३
वर्ग	३
गुण	२
वर्ग	१

एतत्रासौ वर्गस्त
तो विलोमतः कार्यं यथोत्तरगुणः २ अस्य वर्गः ४ अग्रे गुणकोस्ति तो वर्गो यं ४ उत्तरेण गुणितः ८ अ
स्य वर्गः ६४ अयमुत्तरर गुणितः १२८ पुनरस्य वर्गः १६३८४ पुनर्गुणात्के न निघ्नः ३२७६८ पुन
रस्य वर्गः १०७३७४१८२४ इदमेव गुणवर्गजं फलं अथैतद्व्येकं १०७३७४१८२३ व्येकगुणेन १ भक्ते
जातं तदेव आदि २ गुणं संजातं सर्वधनं वराटकाइमाः २१४७४८३६४६ एवमेव कस्मिंश्चाभ्यासे तावं
स्तो वराटकाः ६२१४७४८३६४६ ताः आसां कति निष्का भवंत्यतः परिभाषाक्रमेण निष्कवराटकाभिराभिः २०४८०
भागे ह्रीयमाणे लब्धं निष्काणां लक्षमेकं चत्वारि सहस्राणि अष्टशतानि सप्तपंचाशदधिकानि च १०४८
५७ द्रम्माः ९ पणाः ९ काकिण्यौ २ वराटकाः ६ अत्र वासना प्रथमधनमाद्यदिने दत्तं तत्र गुणोत्तरवृद्धिर्नास्ति ततो
द्वितीयदिनादितः गुणोत्तरवृद्ध्यादत्तं अतो विषमो गच्छो व्येकः तस्य गुणक इति संज्ञा कृत्वा यथात्रैव समगच्छो
दाहरणे आदिर्द्वयं २ गुणोत्तरा द्विगुणा गच्छस्त्रिंशत् एवमादिधनमादौ त्यक्त्वा द्विगुणोत्तरवृद्ध्या त्रिंशद्दिनानां व्यासे
आदिने गुणकमिति शेषः स्यात् द्वितीयदिने च तद्वर्गः तृतीयदिने तु स एव गुणकहतः चतुर्थदिने गुणवर्गस्य व
र्गः एवमन्यधनेंपर्यंतिमे केकांतरेण गुणवर्गत्वं संभवति तथा चैकादितो विषमसमगच्छ पुनः क्रमेण गुण
वर्गता प्रतीयते अथोद्दिष्ट गच्छे विषमगच्छाः कतिसंतानि तावत्याय स्यानिः शेषो भवति तावत्तस्याः विभागाः २

स्ततः समगच्छस्यानमादौ तस्यैवं समगच्छे यो यो विभागो वर्गात्मकः एवमंत्याद्गुणवर्गजं फलं यत्तद्दिस्य दिने यादिध
नादेव फलमानीतं भवति तत्रादिधनस्य गुणोत्तरवृद्धिर्बहिर्भूतत्वेन व्येकं तस्माद्गुणोपि व्येको भवति एवं यदि व्येक
गुणेनैतत्फलं तदादिधनेन किमिति अनुपातेफलमादिधनेन संगुण्य व्येकगुणेन भक्तं सद्दिगिष्टं फलं स्यात् ॥७॥
॥अथ विषमगच्छोदाहरणमाह॥ आदिर्द्वयमिति स्पष्टं ॥ आदिर्द्वयं सखे वृद्धिः प्रत्यहं त्रिगुणोत्तरा ॥ गच्छः सप्त
दिनं यत्र गणितं तत्र किं वद॥२८॥न्यासः आदिः २ उत्तरः ३ गच्छः ७ अत्राप्युक्तवद्गुणवर्गपंक्तिः

गुण	५
वर्ग	३
गुण	२
वर्ग	१

अत्र गुणः
३ अस्य वर्गः ९ गुणेन हतः २७ अस्य वर्गः ७२९ पुनर्गुणेन ३ हतो जातः २१८७ इदमेव गुणवर्ग
२ जं फलं व्येकं २१८६ व्येकगुणेन २ उद्धृतं १०९३ आदिना २ गुणितं २१८६ ॥२८॥ अथैतत्र संगेनच्छ
देः शास्त्रोपयोगि प्रथमेयं वक्तुमारभते सार्द्धया पदाक्षरमितेगच्छ इति स्पष्टपदार्थाविति च पादाक्षरमिते ग
च्छे गुणवर्गजं फलं च यद्द्विगुणा समवृत्तानां संख्या तद्वर्गो वर्गवर्गश्च स्पष्टपरौ नौ स्यातामर्द्धसमानां विष
माणां ॥२९॥ पादाक्षरमिते गच्छे चकल्पिते तथा चयेद्विगुणे सति यद्गुणवर्गजं फलं स्यात् सा समवृत्तानां सं
ख्या भवति अथ तद्वर्गः वर्गस्यापि वर्गश्च तौ स्वस्वचतुर्नौ संतौ अर्द्धसमानां वृत्तानां विषमाणां च संख्ये
स्यातां अयमर्थः यस्य वृत्तस्य समवृत्तादिभेदजिज्ञासा स्यात् तस्य चरणे यावंत्यक्षराणि भवेयुस्त
न्मितं गच्छं प्रकल्प्य तथा चयं द्विगुणोत्तरं प्रकल्प्यानेमेरोक्तवद्गुणवर्गजं फलं यदागच्छति से
व समवृत्तानां संख्या ज्ञेया अथ तस्याः वर्गस्य परेन तथैव संख्ययोनः सन्नर्द्धसमानां

85
2006
42

संख्यास्यात् अथयः समवृत्तसंख्यावर्गस्तस्यापिवर्गः कार्यः सचस्वमूलोनः सन् विषमवृ
त्तानांसंख्यास्यात् अथसमवृत्तादिभेदाश्छंदशास्त्रोक्तज्ञेयाः यथोक्तंवृत्तरत्नाकरे अंघ्रयोयस्यचत्वा
रसमलक्षणलक्षिताः तच्छंदशास्त्रतत्वज्ञाःसमवृत्तंप्रचक्षते १ प्रथमांघ्रिसमोयस्यतृतीयश्चरणो
भवेत् द्वितीयस्तुर्यवद्वृत्तंतदर्द्धसममुच्यते २ यस्यपादचतुष्कोपिलक्ष्मभिन्नंपरस्परं तदाहुर्विषमंवृत्तंछंदशा
स्त्रविशारदाः ३ अत्रोदाहरणमनुष्टुभाह समानामिति समानामर्द्धतुल्यानांविषमाणांपृथक्पृथक् वृत्तानांवदमेसं
ख्यामनुष्टुप्छंदसिद्रुतं १२५ भोगणकसमाणांअर्द्धसमानांविषमाणांचवृत्तानामनुष्टुप्छंदसिपृथक्पृथक्संख्यां
शीघ्रंवद न्यासः अनुष्टुभिअष्टाक्षरात्मकश्चरणोभवत्यः गच्छोष्टौ ८ उत्तरोद्विगुणः २ अत्रापिप्रागवत्सर्पोर्द्धितेवर्गाइतिपूर्व
वृणजातावर्गपंक्तिः | वर्ग वर्ग वर्ग | अथोत्तरः २ अस्यवर्गः ४ अस्यापिवर्गः १६ पुनरस्यापिवर्गः २५६ एतदेवगुणवर्गजंफलं २५६
इयमेवानुष्टुप्छंदसिसमवृत्तसंख्या २५६ अस्याः वर्गः ६५५३६ पृथक् ६५५३६ स्वपदेन २५६ ऊ
नोनितेजाइसमानेसंख्या ६५२८० अथपृथक्स्थोयोवर्गस्तस्यवर्गः ४२९४९६७२९६ अयंस्वपदेना
नेनो ६५५३६ नः सन्जाताविषमानुष्टुभांवृत्तानांसंख्यासेयं ४२९४९०१७६० अत्रोपपत्तिः प्रागुक्तापिविशेषो
निरूप्यतेनचाकानांसमत्वेद्वेधास्वभावतोनिमित्ताच्चयस्याद्दरूतेसतिनसमत्वंभज्यतेसमेसम्यक्
समः तथास्याद्दरूतेविषमत्वंसनिमित्तसमः स्वरूपेनविषमस्यद्विगुणत्वेनसमत्वंजातमास्ती
[illegible] एवंयस्यवृत्तस्यचरणाःस्वभावसमः तत्र [illegible] मादिविधौक्रियमाणोवर्गान्तमेवसंभ ४:
वतित [illegible] चरणोनिमित्तःसमः तत्र [illegible] सभवतिएवंपूर्वापेक्ष्या [illegible] गुणमधिकंस्यादतःसमवृत्तसंख्यावर्गाएवा
र्द्धसमवृत्तसंख्यातथैवविषमवृत्तमिति सर्वप्रागुक्तप्रस्तारविधिना [illegible] ॥ इतिश्रेढीव्यवहारः

तत्कृत्योर्योगपदंकर्णोदोः कर्णवर्गयोर्विवरात् ॥ मूलंकोटिः कोटिश्रुतिकृत्योरंतरात्पदंबाहुः ॥२४॥

॥ अथैवंसप्रपंचंश्रेढीव्यवहारंनिरूप्येदानींक्षेत्रव्यवहारंनिरूपयन्नितत्रादौतत्स्वरूपंभुजको
ट्योःश्वार्याद्वयेनाह ॥ ॥ इष्टाबाहुर्योरिति तथाचतत्कृत्योर्योगपदमीति ॥ इष्टाबाहोर्यःस्यात्
स्पर्द्धिन्यांदिशितरोबाहुः ॥ अस्त्रेचतुरस्त्रेवाकोटिःसाकिर्त्तितातज्ज्ञैः ॥१॥ इष्टोभुजोयस्यांदिशिभ
वत्तत्स्पर्द्धिन्यांतस्संमुखायांदिशियदितरोबाहुःसैवकोटिस्त्र्यस्त्रेत्रिकोणेचतुरस्त्रेचतुःकोणक्षे
त्रेचकिर्त्तिता ॥ अननभुजकोट्योर्नामभेदेवनस्वरूपभेदइतिसूचितं ॥ द्वयोरन्यतमाकोटिर
परोभुजश्चेत्यर्थः दोःशायोभुजोभुजबाहुःकरोहस्तःपाणिरितिपर्यायाः ॥ तथाचकोटिरुछि
स्तुछायाः ॥ कर्णश्रवणःश्रुतिश्रवणाः ॥ एवंभुजकोटियुक्त्यात्रिकोणंक्षेत्रंअथैषामन्यत
मयोर्ज्ञानेन्तरतिपंज्ञातुंसूत्रमार्ययाहतत्कृत्योरितिन्यद्यादीनांपूर्वपरामर्षकत्वात्समछष्टेनपू
र्वोक्तभुजकोटिकृत्योर्योगपदंकर्णः अथकोटावज्ञातायांभुजकर्णवर्गयोरंतरस्यमूलंकोटिः
स्यात् भुजाज्ञानेकोटिकर्णवर्गान्तरंमूलंबाहुःस्यात् ॥२॥ अथप्रकारान्तरेणवर्गयोगंवर्गान्तरंचा
नेतुंसूत्रमनुष्टुभासार्द्धेनाह ॥ राश्योरिति ॥ राश्योरंतरवर्गेणद्विघ्नेघातेयुतेतयोः ॥ वर्गयोगोभव
देवंतयोर्योगान्तराहतिः ॥३॥ वर्गान्तरंभवेदेवंज्ञेयंसर्वत्रधीमता ॥ योयोराश्योर्योगोपेक्षितस्त
योरंतरस्यवर्गेणद्विघ्नेतयोराश्योर्घातेयुतेसतिवर्गयोगःस्यात् ॥ अथैकत्रराश्योर्योगोन्यत्रांत

84
2006
43

रं च नयोराहतिर्गुणनं तद्वर्गांतरं एवं बुद्धिमतां ज्ञेयं सर्वत्र। अत्रोपपत्तिः। समद्विघातो द्विगु
णः समयोर्वर्गयोगो भवेत्। अथ लाघवार्थं तयोर्घातो द्विगुणो राश्यंतरवर्गोनो वर्गयोगो भव
ति सा चेदंतरवर्गयुतः क्रियते तदा वर्गयोगो भवति॥ अथ योगांतराहतिरंतरवर्गो भवति तयोर्वर्गां
तरं राशिवियोगभक्तं योग इति पूर्वमेवोक्तं इत्युपपन्नं॥३॥ अथ पूर्वोक्तश्लोकद्वयविषयीभू
तमुदाहरणमनुष्टुभाहा कोटिरिति॥ कोटिश्चतुष्टयं यत्र दोस्त्रयं तत्र का श्रुतिः॥ कोटिदोः कर्ण
तः कोटिश्रुतिभ्यां च भुजं वद॥४॥ स्पष्टोर्थः न्यासः अथ तत्स्वत्योर्योग इत्यादिना साध्यते य त्र
था भुजकोट्योः ४ वर्गौ १६।९ अनयोर्योगः २५ अस्य पदं जातकर्णः ५ क्षेत्रदर्शनं
अथ राश्योरिति राश्योः ४।३ अंतरं १ अस्य वर्गेण द्विघ्नराश्योः ४।३ घाते २४ युते
जातो राश्योर्वर्गयोगः २५ अस्य पदं कर्णः ५ अथ वर्गांतरं यथा राश्योः ३।५ योगो
वियोगोऽपि ८।२ अनयोराहतिर्जातं वर्गांतरं १६ अस्य पदं कोटिः सैव ४ अथ को 

टिश्रवणाभ्यां भुजनयनार्थं न्यासः 

कोटिश्रुती ४।५ स्वत्योः १६।२५ रंतरात् ९ पदं ३
जातो बाहुः।

अत्रोपपत्तिः॥ यथात्रैवोदाहरणे चतुरंगुलमितां
शलाकां को टिं प्रकल्प्य तथा त्र्यंगुलमितां शलाकां भुजं प्रकल्प्य

तेइ तीर्यगुर्ध्वरूपे प्रसार्य तदग्रे योरंतरे पंचांगुलशलाकामितं कर्णं निवेश्य भुजकोटियो 89/2006
गात्कर्णपर्यंतं लंबाकारामन्यां शलाकां विन्यसेत्। एवं कृते सत्यूर्ध्वाधोविभागे तत्क्षेत्रे भवतित
त्रोर्ध्वविभागे क्षेत्रे पूर्वं या कोटिरासीत्स कर्णो जातः कर्णोर्ध्वखंडे कोटिर्जाता लंबशलाका
च भुजः। एवमधोविभागे भुजः कर्णो जातः कर्णाधःखंडं भुजः लंबशलाका च कोटिः॥ अथानु
पातः। यदि पंचमिते कर्णे ५ चतुर्मिता ४ कोटिस्तर्हि चतुर्मिते किमिति ५।४।४ फलं ४ मिच्छा
या ४ गुणं १६ प्रमाणेन ५ भक्तं कर्णोर्ध्वखंडं १६/५ अथ पंचमिते कर्णे त्रिमिते भुजस्तर्हि त्रिमि
ते किमिति ५।३।३ प्रागवल्लब्धं कर्णाधःखंडं ९/५ मीदं (पंचमीतकर्णं) अनयोर्योगे क्रिय
माणे २५/५ भुजकोटिवर्गयोरेव योगः समोस्तितस्मिन्नुच्छेदीभूतेन कर्णेन ५ हृते लब्धं कर्ण
एवास्यैद्रतः स एव कर्णवर्ग इति ज्ञातं। अथवा कर्णप्रमाणं यावत्तावन्मितं प्रकल्प्य ततः
क्षेत्रे विपरिते न्यस्ते त्र्यस्तं त्रिभुजत्वमेति त्र्याद्यलमिति विस्तरात्। एवं क्षेत्रं जातं॥ ॥ अथाभिन्नो
दाहरणं॥ सांघ्रीति॥ सांघ्रीत्रयमितो बाहुर्यत्र कोटिश्च तावती॥ तत्र कर्णप्रमाणं किं क्षे
त्रं प्रब्रूहि मे द्रुतं॥५॥ स्पष्टं न्यासः छेदघ्नेति सवर्ण्य जातौ १३/४ १३/४ अनयोर्वर्गौ १६९/१६ १६९/१६
अथ योर्योगो द्वाभ्यामपवर्तितः १६९/८ जातो वर्गयोगः अस्य मूलं न संभवत्यतः अस्य पद

पदत्वात्कर्णः करणिगत एव ज्ञेयः। तथाप्यासन्नमूलेन भवितव्यमिमत आह अस्येति। अ
पासन्नमूलानयनार्थं सूत्रमनुष्टुभाह। वर्गेणेति। वर्गेण महतेष्टेनाधाच्छेदांशयोर्हता
त्। पदं गुणपदक्षुण्णछिद्भक्तं निकटं भवेत्॥१॥ छेदांशयोर्वधात्महता केनचिदिष्टेन वर्गेण
हतात् सकाशात् यत्पदं तद्गुणपदक्षुण्णं नामयः महानिष्टवर्गो गुणकः कल्पितोऽस्ति स एव गु
णकः तस्य यत्पदं तेन गुणितेन छेदेन भक्ते सदासन्नमूलं भवेत्। अत्रोपपत्तिः करणिवर्गः स्व
छेदेन भक्तः सन् कर्णवर्गो भवति तस्य मूलं कर्णः। अथ करणिगतवर्गस्य छेदेन भागो न गच्छ
तीत्यतः अभीष्टमंकं प्रकल्प्य तेन स्वच्छेदगुणकेन करणिगतवर्गं संगुण्य तस्य मूलं छेदभक्तं
सदासन्नमूलं भवतीति प्रकारान्तरं दर्शितं। एवं पदक्षुण्णः कल्पितस्तस्य वर्गं कृत्वा तेन छेदेन छे
दस्य वर्णितेन गुणनं कार्यं यतो वर्गेण वर्गं गुणयेद्भजेच्चेति करणिगुणनप्रकारोऽस्ति अथेष्ट
वर्गगुणितस्य वर्गस्य यन्मूलं तदिष्टगुणितं छेदगुणितमधिकं भवति अतश्छेदगुणेष्टभ
क्ते सदासन्नपदं स्यादित्युपपन्नं। अथ कोगतस्यास्य वर्गस्य न्यासः। १६९ छेदांशयोः १६९ गु
णनं १३५२ अहः कल्पितेन महदिष्टस्य १०० वर्गेण १०००० गुणितं जातं १३५२०००० अस्य मू
लमासन्नं ३६७७ एतद्गुणस्यास्य पदे १०००० पदेन १०० क्षुण्णेन गुणितेन छिद्रा ८०० भक्तं स ४४

जातमासन्नमूलं ४ ७७ अथाद्यः पदं कियत्संख्यं किमात्मकं इति मुग्धत्रैवर्णिकं न्यते तद्यैग
णितरहस्ये सूर्य ८०० कृतं आश्रितपदहृतिर्युक्ताभीष्टहतिर्द्विगुणमूलभक्तांशः॥ वांछिता
दवशेषात्सावयवं स्यात्मूलं।१। अत्र पूर्वकर्णगतवर्गमेनं १६९ स्वच्छेदेन ८ भक्त्वा लब्धं
कर्णवर्गः २१ अस्यासन्नपदं कर्णो भवतीति कृत्वा आश्रितपदहृतिर्युक्तेत्यादिना एकविंशतेः २१
राश्रितपदं ४ अस्य हृतिः १६ अनया पूर्वा १६ गता भीष्टहतिः २१ पूर्वा ३७ असौ पूर्वागतेन ४ द्वि
घ्नाश्रितपदेन ८ भक्ता लब्धं ४ शेषं षष्ट्या ६० संगुण्य ३०० पुनर्हृतं सज्जातं सावयवं ४ ३७ अथा
स्य गोमूत्रिकान्यायेन वर्गः २१ अभिष्टवर्ग २१ युतः अस्मिन्द्विगुणसावयव ३० मूलेना
४ ३७ नेन सवर्ण्य भक्तं लब्धं २ मेकविंशतेर्मूलं ४ तथा ५ चापोक्तप्रकारेऽपि गुणपदक्षुणछि
३० द्र भक्तं क्रमित्यत्र भागो क्रियमाणे लब्धा निरूपा। शेषं ४११ चतुर्दशभिः रूपवर्णसंप्र
वर्णरूपादधः स्थाप्य जातं तदेव ४ अस्य वर्गो गोमूत्रिकया क्रियमाणे पुनर्जाता ए
कविंशतिः। एवं सर्वत्र। अथ भुजकोट्योरेकतरज्ञाते इतरद्वयस्यज्ञानार्थं जात्यत्र्य
स्रे प्रकारद्वये सूत्रद्वयमाह॥ इष्टो भुजोऽस्माद्धीति॥ इष्टो भुज इति च। इष्टो भुजोऽस्माद्द्विगुणे
ष्टनिघ्नात् इष्टस्य कृत्यैकवियुक्तया यत्। कोटिः पृथक् सेष्टगुणा भुजोना कर्णो भवेत्त्र्यस्र
मिदं भुजान्त्यं॥१॥ इष्टो भुजोऽस्मान्नतिरिष्टभक्ताद्विःस्थापिते ह्येन युतार्द्धिता वा॥ तौ कोटिक

र्णाविति कोटितो वा बाहुः। श्रुतिर्वा करणीगतेस्तः॥८॥ यदिष्टो भुजः कल्पितः अथवेष्टो ज्ञातो यो भुजः
स द्विगुणं यथादिकमिष्टं तेन गुण्यः अस्मात्सकाशादेकरहितेन येष्टवर्गेण भाज्यः सा कोटिः स्यात् तां पृ
थक्स्थाप्य इष्टेन संगुण्य भुजोना सत्या कर्णः स्यात् एवमिष्टाद्भुजात्कोटिकर्णौ स्त इत्युक्तम् उत्पद्यते तज्ज्ञा
त्यं त्र्यस्रं॥९॥ द्वितीयप्रकारमाह। इष्टेनेति। इष्टो येष्टपो भुजः तत् द्विगुणितेष्टेन भक्तः प्राद्द्विःस्थापितः क
माद् इष्टोनयुतार्द्धिता च सतीति वेति प्रकारान्तरे कोटिकर्णौ स्यातां। इत्यमुना प्रकारेण वेत्यथवा
कोटितो बाहुकर्णौ भवतः या कल्पिता दृष्टा वा कोटिः स्मृतिरिष्टभक्ताद्द्विःस्थाद् इष्टेनोनाऽर्द्धिता
सती बाहुश्श्रुतिर्भवति इत्यर्थः कीदृशी कोटिः श्रुतिः अकरणीगते वर्गत्वेनाभिते सत इत्यर्थः॥ उदा

२ हरणं। भुजेति। भुजे द्वादशके यौ यौ कोटिकर्णावनेकधा। प्रकारांस्त्रींश्च वद क्षिप्रं तौ तावकरणीगतौ॥

१॥ न्यासः भुजः इष्टं २ द्विघ्नेष्टेन ४ गुणितो भुजः ४८ इष्टं २ कृत्या ४ एकयोनया ३ हृता कोटिः १६
पृथगिष्टघ्नी गुणिता ३२ भुजोना जाता कर्णः २० एवं भुजः १२ इष्टेन ३ द्विघ्नेन ६ निघ्नः ७२ इष्टस्य कृ

त्यैकवियुक्तया ८ आप्ता ९ कोटिः ९ पृथक्स्था ९।९ इष्टगुणा २७ भुजोना १२ जातः क
र्णः १५॥ एवं पंचेष्टेन अथ प्रकारान्तरेणाह। इष्टा भुजा इति सूत्रं बा
हुः १२ अस्य कृतिः १४४ इष्टेन ४ भक्ता ३६ द्विःस्था इष्टोनयुता ३२।४० अर्द्धि
ता जाता तौ कोटिश्रवणौ १६।२० अथवेष्टं ३ एवं बाहुः १२ अस्य वर्गः १४४

इष्टभक्तः ७२ द्विस्थः ७२।७२ इष्टोनयुतश्च ७०।७४ अर्द्धितौ जातौ कोटिकर्णौ ३५।३७ अथे
ष्टा कोटिः १६ अस्या वर्गः २५६ इष्टेन २ हृतः १२८ द्विस्थः इष्टोनयुतार्द्धितश्च ६३।६५ जातौ
बाहुकर्णौ ६५ एवमीष्टा कोटिः ३५ अस्याः कृतिः १२२५ इष्टेन ४९ भक्ता २५ द्विःस्थो
इष्टोन २५ युता २४।७४ अर्द्धिता जातौ बाहुश्रुती १२।३७ अकरणीगते क्षेत्रे पुनरिष्टो
१२।१ भुजः अस्य वर्गः १४४ इष्टेन भक्ते २४ द्विःस्थः इष्टोनयुक् १८।३० अर्द्धितः जातौ को
टिकर्णौ पूर्वसमौ ९।१५ पुनरिष्टो भुजः १२ अस्य वर्गः १४४ इष्टेन ८ भक्ते १८ द्विःस्थे इष्टे
नयुतार्द्धितश्च जातौ कोटिकर्णौ ५।१३ जात्यमौ एवं दृष्टवशादानंत्यं॥ अत्रोपपत्तिः। उद्दिष्ट
भुजक्षेत्रोपेक्षया कुत्रचिल्लघुक्षेत्रे द्विगुणेष्टमीता कोटिर्भवति तथेष्टवर्गाऽनिरेकस्तत्रैव
भुजो भवतीति नियमो दृष्टः। यथात्रेष्टं २ द्विघ्नं जातं कोटिः ४ अथेष्टस्य वर्गः ४ निरेको जातो
भुजः ३ एवं भुजकोटिः ३।४ अथवा पत्रेष्टं ३ द्विघ्नं ६ जातं कोटिः ६ तथेष्टवर्गः ९ निरेको जातो
भुजः एवं दोःकोटी ६।८ अथानुपातः यद्यनेन भुजेन ३ रूपं कोटिः ४ तदा उद्दिष्टभुजेन किमिति
प्र ३ फ ४ इ १२ उद्दिष्टभुजो द्विगुणेष्टेन गुणितः निरेकेष्टवर्गेणाभक्तः फलं कोटिर्भवति
एवं सा कोटिर्यदिष्टेन गुण्यते तदा भुजकर्णयोर्योगो भवति तथा सैवेष्टेन भाज्यते तर्हि
भुजकर्णयोरन्तरं भवति यतः इष्टवशादेतयोर्ह्रासवृद्धी भवतः एवं भुजकर्णयोर्योगाद्

93
2006
46

ऽविशोधिते शेषं कर्णः स्यात् वा तयोरंतरे भुजा ऽस्ते तथा सति कर्णः स्यात् इष्टस्य । अथेष्टा भुज इति ॥ अत्रेष्ट
मितांतरौ कोटिकर्णौ स्यातां तत्र भुजवर्गादिष्टहृताद्व्यस्थं सकोटिकर्णयोगः यस्ततो भुजवर्गस्तु कोटिकर्ण
योर्वर्गांतरमितो भवति कोटिश्रुती स्तयोरंतरात्स इष्टं बाहुरित्युक्तेः एवं वर्गांतरराशियोगभक्ते इत्यादि
ने इष्टमितेन राश्यंतरेण भुजवर्गे भक्ते योगो लभ्यते ॥ इष्टश्च तयोरंतरं । अथ योगांतरेणोनयुतो द्विता
स्तावितिसंक्रमे कोटिकर्णौ भवतः ॥ अत उक्तं ॥ द्विस्थापितेष्टनयुतार्द्धिता वेति ॥ अथ च यत्रेष्टमितां
तरौ भुजकर्णौ स्यातां तत्र कोटिवर्ग इष्टहृते सति भुजकर्णयोगो ज्ञायते यतस्तत्रेष्टश्च तयोरंतरं कोटिव
